नं० ८६३-घ

मलमासनिर्णयः (धर्मशास्त्राम्)

पत्राम् १ (एकमेव) (सम्पूर्णम्)

नं० ८७२-घ

।प्रकाशे। प्रायशोऽन्त्यभश्चे वाऽन्त्ये ह्यंशा षाढ एव च। मध्यमौ चैत्रवैशाखौ वाऽधिकोऽन्यः स्मृतिक्रमात्।१६।

॥ अथ मलमासनिर्णयः ॥ सिद्धांतशिरोमणौ । असंक्रांतिमासोधिमासः स्फुटः स्याद्द्विसंक्रांतिमासः क्षयाख्यः कदाचित् । क्षयः कार्त्तिकादित्रये ना
न्यतः स्यात्तदा वर्षमध्येधिमासद्वयं च ॥१॥ पितामहः । अष्टाधिमासाः सुनिश्चयेन प्रोच्यंते फाल्गुणादयः । सौम्यपौषौ क्षयौ स्यातां नित्यं भवेतां
मिति निश्चितं ॥२॥ क्षयो वाप्यधिमासो वा ऊर्जे यद्दृति निश्चितं । न क्षयो नाधिमासः स्यान्माघो वै परिकीर्तिताः ॥३॥ पंच मासस्तु वैशाखा
दधिमासव्यवस्थितः । भवति वा त्रिभिर्वर्षैर्भवेवार्कनिशाकरो ॥४॥ तथैव फाल्गुणे चैत्र आश्विनः कार्त्तिकोधिमासः । एते किंडेः
शरांगेवी कदाचित्तोकुवत्सरैः ॥५॥ मार्गपौषौ क्षयौ स्यातां कदाचित्कार्त्तिको भवेत् । अधिमासस्तदा ज्येष्ठो भवेन्निःसंशयो यदा
॥६॥ क्षयात्प्रागधिमासांते निःसंभाव्य दत्रये । आश्विनोर्जौ सिंहास्यातामादो भाद्रपदः स्मृत ॥७॥ पौलिश सिद्धांते । स्फुटगत्यायदा
चन्द्रो रविमंडलनेमिगः । तदूर्ध्वं संक्रमो भानोर्मासः स स्यान्मलिम्लुचः । सुंदर सिद्धांते । दर्शाग्रतो मंडलनोङ्किांतेमासः स स्थैर्येनु
समागमांतः । तदंतरे चेद्रविसंक्रमः स्यात्तदा सशुद्धोत्वधिकोन्यथा सो ॥८॥ कालनिर्णयः । संक्रमो यदि भवेद्रवेस्ततो मंडलाद्बहिर
निर्गतो विधो । उच्यते स हि ससंक्रमो बुधैः शुद्धमास इतरो मलिम्लुचः ॥१०॥ लल्लः । यदा शशी याति गभस्तिमंडले दिवाकरः संक्रम
णं करोति तु । विवाहयज्ञोत्सवनाशहेतुकस्तदाधिमासः कथितः स्वयंभुवा ॥११॥ रत्नमालायां । स विधु मंडलमेति यदा शशी तदनु
संक्रमणं कुरुते रविः । मखमहोत्सवनोशकरस्तदा मुनिवरैः कथितोधिकमासकः ॥१२॥ श्रीफलग्रंथे । चंद्रार्कयोस्तु विवेकं प्रति
पद्दर्शसंधिषु । तिष्ठंतोद्वरुभयतो रसनाड्यो र्कमंडलं ॥१३॥ स्वमंडलाच्छशी गच्छेत्ततः सूर्यस्य संक्रमं । मासोसो मलिनः प्रोक्तस्त
दधीनोधिकः स्मृतः ॥१४॥ पितामहः । प्रतिपद्दर्शसंधौ तु विवेकं चेन्दुसूर्ययोः । जवांतरेण षष्टिघ्ने नाडिकाश्चार्कमंडलं ॥१५॥ ज्योतिः